International Journal of Sanskrit Research 2020; 6(2): 83-87

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(2): 83-87
© 2020 IJSR
www.anantaajournal.com
Received: 14-01-2020
Accepted: 17-02-2020

ज्योति आर्या
शोधच्छात्रा, व्याकरणविभागः
राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः,
भारत।

Corresponding Author:
ज्योति आर्या
शोधच्छात्रा, व्याकरणविभागः
राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः,
भारत।

# पाणिनिनये तद्धितप्रत्ययविमर्शः

## ज्योति आर्या

### प्रस्तावना

पाणिनीयव्याकरणे द्विविधाः प्रकृतयः भवन्ति – धातुरूपा प्रातिपदिकान्ताश्च। धातुप्रकृतिभ्यः कृत्प्रत्ययाः विधीयन्ते तिङ्-प्रत्ययाश्च। प्रातिपदिकप्रकृतेः स्वादयः एकविंशतिः प्रत्ययाः [1] विधीयन्ते। सुबन्तानि च तानि पदान्युच्यन्ते [2]। अथापि 'ङ्याप्प्रातिपदिकात्'[3] इत्यधिकारात् प्रातिपदिकप्रकृतेः ये प्रत्ययाः विधीयन्ते, तेषु केचन स्त्रीप्रत्ययाः अपरे च तद्धितसञ्ज्ञकाः। अस्य प्रपत्रस्याविषयत्वात् स्त्रीप्रत्ययानामिह चर्चायाः प्रसङ्गो नास्तीति विरमामः। तद्धितसञ्ज्ञकानां प्रत्ययानामत्र विषये प्राप्तानां समासेन किञ्चित् निगद्यते।

अष्टाध्याय्याः चतुर्थाध्यायस्य प्रथमपादस्य षट्सप्ततिसूत्रादारभ्य पञ्चमाध्यायस्य चर्तुथपादस्य अन्तिमसूत्रपर्यन्तं तद्धितप्रत्ययाः विधीयन्ते। तद्धितवृत्तौ अर्थानुसारं लौकिकविग्रहं विधाय अलौकिकविग्रहप्रसङ्गेन 'समर्थानां प्रथमाद्वा'[4] इति सूत्रनियमात् प्रथमाद् समर्थात् प्रातिपदिकात् प्रत्ययाः विधीयन्ते। प्राथम्यं च अधिकारसूत्रेषु 'तस्मै हितम्'[5] 'तस्यापत्यम्'[6] 'तस्येदम्'[7] 'स एषां ग्रामणीः'[8] इत्याद्यधिकारसूत्रेषु प्रथमपठितपदात् निश्चीयते। तस्मात् प्रथमप्रातिपदिकात् प्रत्यये सति अपरं प्रातिपदिकं स्वयमेव विगलितं भवति।

तद्धितप्रत्ययेषु ञिति, णिति, किति च प्रत्ययेषु अचामादेरचः स्थाने अकारस्याकारः, इकास्यैकारः, उकारस्यौकारः, ऋवर्णस्य आर् इति वृद्धिर्भवति[9]। स्वादौ यकारादावजादौ च प्रत्यये परतः भसञ्ज्ञायां[10] सत्यां इकारोकारयोः गुणवृद्धी भवतः। तेन औपगवः इत्याद्युदाहरणानि सिद्ध्यन्ति। वृद्धिप्रकरणञ्चाष्टकस्य सप्तमेऽध्याये द्वितीयतृतीयपादयोः वर्णितमस्ति।

एवं तद्धितवृत्तिद्वारा सुबन्तानां पदानामनेकार्थानां वैलक्षण्यमधिगतानां प्रयोगः संसाधितो भवति। मत्वर्थीयाः शैषिकाः, अपत्याः, विभक्त्यर्थाः समासान्ताश्च प्रत्ययाः विशेषत्वेनात्र विधीयन्ते। सङ्ख्यावचनानां परिमाणार्थबोधकानाञ्च पदानामत्रैव संसाधनं सम्भवति।

### तद्धितपदव्युत्पत्तिः –

'तद्धित' इत्येषा सञ्ज्ञा पूर्वाचार्यैः विहिता पाणिनिनानुकृता विज्ञायते, अस्मिन् पदे पदद्वयं वर्तते। तत्पदं हितपदञ्च। 'हित' शब्दः 'डुधाञ् धारणपोषणयोः'[11] धातोः भूतकालिके क्त प्रत्यये[12] परतः 'दधातेर्हिः'[13] इति हिकारादेशे सिद्ध्यति। धारणपोषणे अस्य धातोः अर्थौ। भूतकालिकप्रत्ययसन्नियोगेन यद्धारितं यच्च पोषितं तत् हितपदेन वक्तुं शक्यते। कोषग्रन्थेषु हितशब्दः कल्याणार्थकः प्रसिद्धो वर्तते। यद्धारितं पोषितञ्च तदैव कल्याणवहमिति नास्ति धात्वर्थेन वैमत्यम्। 'हि गतौ'[14] धातोरपि

---

[1] 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्'। अ. ४/१/२
[2] 'सुप्तिङन्तं पदम्'। अ. १/४/१४
[3] अ. ४/१/१
[4] अ. ४/१/८२
[5] अ. ५/१/५
[6] अ. ४/१/९२
[7] अ. ४/३/१२०
[8] अ. ५/२/७८
[9] 'तद्धितेष्वचामादेः'। अ. ७/२/११७
[10] 'यचि भम्'। अ. १/४/१८
[11] धातुपाठः, जुहोत्यादिगणः,
[12] 'क्तक्तवतु निष्ठा'। अ. १/१/२५
[13] अ. ७/४/४२
[14] धातुपाठः, स्वादिगणः

क्त प्रत्यये परतः हितशब्दस्य सिद्धिः सम्भवा। गतेस्त्रयोऽर्थाः भवन्ति – ज्ञानम्, गमनम्, प्राप्तिश्चेति। समेऽपि भाषाविदोऽत्र समधियो वर्त्तन्ते। तेन यद्गतं यल्लब्धं यज्ज्ञातं तत् सर्वं हितशब्देन व्यवह्रियते। अधुना तत् पदेन हितपदस्य समासे तत्पुरुषे समासे तं हितः तद्धितः, तेन हितः तद्धितः, तस्मै हितः तद्धितः, तस्मात् हितः तद्धितः, तस्य हितः तद्धितः, तस्मिन् हितः तद्धितः। एवं सर्वासु विभक्तिषु तद्धितशब्दः व्युत्पादयितुं शक्यते। सर्वत्र चास्यशब्दस्य पृथक् –पृथक् अर्थाः भविष्यन्ति। किन्तु अत्र चतुर्थी विभक्त्यन्तं तस्मै हितः तद्धितः इत्येषोऽर्थः प्रसङ्गप्राप्तो गृह्येत इत्यस्मदीयाभ्यर्थना। चतुर्थी-तत्पुरुषसमासविषये कस्यचिदपि विप्रतिपत्तिर्नास्ति। किन्तु तस्मै पदस्य वाच्य-विषये अस्ति सन्देहावसरः। सर्वनामानि तु सर्वेषां नामानि भवन्ति, तेन सर्वनामभूतेन तत्-पदेन किं गृह्येत इत्यस्मिन् विषये विचारसरणिरनुसर्तव्याः। केचन विद्वांसः कथयन्ति यत् तस्मै इत्यनेन पदेन प्रत्ययोऽवमृश्यते। तस्मै प्रत्ययाय हितः तद्धितः इति। डॉ. विन्देश्वरीप्रसादशुक्लमहोदयः[15] तस्मै इति पदेन प्रत्ययमेव स्वीकरोति, किन्तु अत्र सन्देहावसरोऽस्ति। यतोहि प्रत्ययस्यैव सञ्ज्ञा तद्धित इति, यदि तस्मै पदेन प्रत्ययोऽवगम्यते तर्हि कः कस्मै हितङ्करोति? इति प्रश्नः समुदेति। अन्योन्याश्रयदोषश्चापद्यते। अतो मन्मते तस्मै इति पदेन अर्थः गृहीतव्यः। अनेन तस्मै अर्थज्ञापनाय हितः, धारितः, पोषितः, प्राप्तः ज्ञातो वा तद्धित इति सर्वोऽपि धात्वर्थोऽत्र सङ्गच्छते। एष एव अर्थः सम्यक् प्रतीयते। तस्मै पदेन प्रत्यये गृह्यमाणे अन्योन्याश्रयदोषः आपद्यते। अन्योन्याश्रयाणि कार्याणि न प्रकल्पन्ते इति पाणिनेर्नयः। अतः येन प्रत्ययेन अर्थज्ञाने हितं भवति अथवा येषु प्रत्ययेषु अर्थज्ञानं हितं = निहितं भवति। त एव तद्धितप्रत्ययाः।

कोषग्रन्थेषु तद्धितशब्दप्रसङ्गे हिन्दीभाषायां लिखितमस्ति यत् 'उसका हित' वे प्रत्यय जो सञ्ज्ञा और विशेषण आदि से नए शब्द बनाते हैं'[16]। आङ्ग्लभाषायामपि तथैवोक्तमस्ति[17]। कोशग्रन्थे यथा तद्धितशब्दस्यार्थो लिखितोऽस्ति। तस्य भावः एतद् एव भवति यदत्र तद्धितपदे तत् शब्दः अर्थायैव स्यात् न प्रत्ययाय तर्हि ये प्रत्ययाः अर्थविशेषपरिज्ञानाय तेषु-तेषु अर्थेषु प्रयुज्यन्ते त एव तद्धितपदेन भण्यन्ते इत्येषः तद्धितार्थः।

तद्धितार्थं विविच्य अधुना पाणिनीयव्याकरणशास्त्रे तद्धितस्य किं स्थानम्? तस्य किं महत्त्वम्? अस्मिन् काले तद्धितप्रत्ययानां तद्धितान्तानाञ्च का उपयोगिता? इत्येते प्रश्नाः प्रासङ्गिकाः इति विचार्य अत्र द्वितीयप्रकरणे तेषां समाधानं प्रस्तोष्यते।

**तद्धितस्य स्थानम्** –

स्वकीये स्वान्ते समागतानां विचाराणां परस्वान्ते सङ्क्रमयितुं भाषायाः प्रयोगो भवति। येन केनापि प्रकारेण साधुनाऽसाधुना वा पदेन भावाभिव्यक्तिः कर्तुं शक्यते। किन्तु शास्त्रीयनियमोऽस्ति यत् साधवः एव शब्दाः प्रयोज्याः नासाधव इति। उवाच हि महाभाष्यकारः पतञ्जलिः – 'शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन'[18] अर्थात् यथा शास्त्रे विहिताः तथैव शब्दाः प्रयोज्याः तथाकृतेऽभ्युदयो भवति। वेदशब्दाः अपि तथैव कथयन्ति। शास्त्रपूर्वकत्वं हि साधुत्वं साधवो हि प्रयोज्याः। साधुत्वे सम्पाद्यमाने शब्दानां शास्त्रं तत्र प्रयुज्यते। महर्षिः पाणिनिराचार्यः लौकिक-वैदिकोभयशब्दानां साधुत्वप्रतिपादनायैव व्याकरणं रचयामास। तथा हि व्याकरणस्यारम्भः शब्दानुशासनमिति नाम्ना कृतमास्ते। शब्दानुशासनेऽस्मिन् शात्रे यादृशी शब्दानां प्रवृत्तिः, तादृशाः शास्त्रीयनियमाः वर्तन्ते। प्रथमा भाषा भाषां च वीक्ष्य व्याकरणस्य विधानं कृतमस्तीति नात्र काचित् विप्रतिपत्तिः। यतोहि वाचस्पतिस्तु स्वयमेव जगदीश्वरः पदानां, पदार्थानां च सर्वेषामादिमूलं परमेश्वर एव तेनैव कृतेन साक्षात्सङ्केतेन पदार्थविज्ञानं भवति इत्येष नयो न्यायशास्त्रे वर्तत एव। तथाहि महर्षि मनुरुवाच -

**सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्।**
**वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे**[19]॥

व्याकरणनये शब्दानां द्वैविध्यं सुप्रसिद्धमेवास्ते। व्युत्पन्नाः शब्दाः अव्युत्पन्नाश्च। वैय्याकरणाः मन्वते यत् यानि पदानि जगति प्रयुज्यन्ते तानि सर्वाणि धातुजानि नैरुक्ताश्च तथैव स्वीकुर्वन्ति किन्तु केचन वैय्याकरणाः सर्वाणि पदानि धातुजानीति न स्वीकुर्वन्ति[20]। तेषां मतमस्ति यत् व्युत्पन्नाव्युत्पन्नभेदेन शब्दाः द्विविधाः। ये शब्दाः प्रकृतिप्रत्ययद्वारा संसाध्यन्ते ते व्युत्पन्नाः, यत्र च प्रकृतिप्रत्ययादिपरिकल्पना सुस्थिरा नास्ति तेऽव्युत्पन्नाः। व्युत्पन्नानां पदानां कृते महर्षिपाणिनिः धातुपाठे धातून् अष्टाध्यायां च प्रत्ययान् पठित्वा तेषां निष्पादनाय व्यवस्थां कृतवान् अस्ति। किन्तु ये अव्युत्पन्नाः तेषां कृते गणपाठं पठितवान् अस्ति। परिशिष्टरूपेण बहुलम् उणादिप्रत्ययानां व्यवस्था कृता वर्तते। एतेन विज्ञायते यत् व्युत्पन्नानां कृते कृदन्तव्यवस्था अव्युत्पन्नानाञ्च कृते तद्धितान्तव्यवस्था वर्तते।

तद्धितप्रत्ययाः प्रातिपदिकप्रकृतिभ्यो विधीयन्ते। प्रातिपदिकसञ्ज्ञा च द्विविधा वर्तते[21]। अर्थवच्छब्दः प्रातिपदिकसञ्ज्ञो भवति धातून् प्रत्ययान् च वर्जयित्वा अपरत्र कृदन्ताः तद्धितान्ताः समासान्ताश्च प्रातिपदिकसञ्ज्ञां लभन्ते। द्विविधाभ्यामपि प्रातिपदिकाभ्यां तद्धितप्रत्ययाः विधीयन्ते ते च यथायथं पाणिनीयव्याकरणे चतुर्थाध्यायस्य प्रथमपादस्य 'तद्धिताः'[22] इति सूत्रादारभ्य 'निष्प्रवाणिश्च'[23] इति सूत्रपर्यन्तं विहिता वर्तन्ते। तद्धिताधिकारविहितसूत्रेषु अनेकत्र साक्षात् प्रातिपदिकानि पठितानि सन्ति। यथा 'क्षत्राद् घः'[24], 'कुलात्खः'[25] इत्यादि। कुत्रचित् च सर्वनामप्रयोगेण, सञ्ज्ञाप्रयोगेण वा प्रत्ययाः विहिताः वर्तन्ते। यथा 'तस्यापत्यम्'[26], 'तस्येदम्'[27], 'तेनैकदिक्'[28], 'तस्मै हितम्'[29] इत्यादि। अथ सञ्ज्ञाभ्यः 'सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च'[30], 'अव्ययसर्वनाम्नामकच् प्राक्टेः'[31], 'तिङश्च'[32], इत्यादि। अनेकत्र चादि-पदद्वारा एकस्मिन् शब्दे प्रयुक्ते अपरेषां ग्रहणं गणपाठदिशा कृतमास्ते। यथा – 'शिवादिभ्योऽण्'[33], 'उगवादिभ्यो यत्'[34] इत्यादि एवं त्रिभ्यः सरणिभ्यः प्रत्यया विहिता वर्तन्ते। अव्युत्पन्नप्रातिपदिकेभ्यः अनेकार्थान् निष्पादयितुं तद्धितप्रत्ययाः विधीयन्ते। तद्धिता इत्येषा सञ्ज्ञा पूर्वाचार्यैः कृता वर्तते, अन्वर्था चैषा सञ्ज्ञा। अर्थज्ञापनाय ये हितकारकाः प्रत्ययाः त एव तद्धिता इति। यथा कृदन्ताः शब्दाः साधवः सन्तः प्रयुज्यमानाः शं वहन्ति तथैव तद्धिता अपि। अष्टाध्याय्याः तृतीयाध्याये विहिताः प्रत्ययाः धातुपाठे च पठिताः धातवः तयोः समागमेन कृदन्तपदनिष्पत्तिर्भवति। अथ अष्टाध्याय्याः चतुर्थपञ्चमाध्यायपठितेभ्यः सूत्रेभ्यः प्रत्ययविधानं गणपाठपठितेभ्यश्च प्रकृतिभ्यः तेषां समागमः। एतेन तद्धितान्ताः शब्दाः निष्पाद्यन्ते। एकस्मिन् अध्याये कृदन्ताः द्वयोः अध्याययोः तद्धितान्ताः। एतेनैव हि ज्ञायते तद्धितान्तानां स्थानं महत्त्वञ्च। लोके वेदे च सर्वत्र तद्धितान्तप्रयोगाः प्रायशः प्रयुज्यमानाः दरीदृश्यन्ते। तद्यथा वेदे – 'पुमान् पुंसोऽधितिष्ठः'[35], 'तावद्वां चक्षुष्ततिः'[36], 'तेषां ज्योतिष्मान् मधुमान्योऽग्रे'[37], 'श्रेष्ठतमाय कर्मणे'[38], 'वैश्वानरमृत आजातमग्निम्'[39]।

---

[15] शोधग्रन्थः – 'पाणिनीय-तद्धितपरिशीलनम्', वाराणसेय-संस्कृत-विश्वविद्यालयः, वाराणसी-१९९३

[16] Neeta Hindi English dictionary. Page no.- 294

[17] His help, those suffixes which make new words form nouns and adjectives etc. the words which are made with the help of suffixes.

[18] महा. भा., पस्पशाह्निकम्

[19] मनु. १/२१

[20] 'नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्। यन्न पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम्॥ (म. ३/३/१)

[21] (क) 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्'। अ. १/२/४५
(ख) 'कृत्तद्धितसमासाश्च'। अ. १/२/४६

[22] अ. ४/१/७६

[23] अ. ५/४/१६०

[24] अ. ४/१/१३८

[25] अ. ४/१/१३९

[26] अ. ४/१/९२

[27] अ. ४/३/१२०

[28] अ. ४/३/११२

[29] अ. ५/१/५

[30] अ. ४/३/२३

[31] अ. ५/३/७१

[32] अ. ५/३/५६

[33] अ. ४/१/११२

[34] अ. ५/१/२

[35] अथर्व. १२/३/१

उपर्युक्तमन्त्रेषु पुमान्, तावत्, ज्योतिष्मान्, श्रेष्ठतमाय, वैश्वानरः इतीमानि पदानि तद्धितप्रत्ययान्तानि एव वर्त्तन्ते। एवं लोकेऽपि सर्वत्र तद्धितप्रत्ययान्ताः शब्दाः बहुधा प्रयुज्यन्ते। यथा – अधुना, इदानीम्, शौनकः, बुद्धिमान् इत्यादीनि। एभिः प्रमाणैः डिण्डिमघोषेण वक्तुं शक्नुमो यद् यथा कृदन्ताः, सुबन्ताः, तिङन्ताश्च शब्दाः प्रयुज्यन्ते, तथैव उभयत्र लोके वेदे च तद्धितान्ताः प्रयुज्यन्ते।

**तद्धितस्य महत्त्वम् –**

पदानां साधुत्वविवेचनेऽस्मिन् शब्दानुशासने शब्दानां प्रकृतिं प्रवृत्तिं च वीक्ष्य ये येऽर्थाः तद्धितप्रत्ययैः सम्पादिताः सन्ति, ते तेऽर्थाः अन्यप्रकारेण सम्पादयितुं न शक्यन्ते। यथा समासेन वाक्यस्थाने पदस्य प्रयोगो भवति, तथैव तद्धितप्रत्ययैश्च वाक्यस्य स्थाने पदप्रयोगःसाधुत्वमेति। यथा बुद्धिर्विद्यते यस्य यस्मिन् वा इति वाक्यस्य स्थाने बुद्धिमान् पदं प्रयुज्यते। एतत् तद्धितप्रत्ययैनैव साधयितुं शक्यते। तद्धितप्रकरणस्य महत्त्वं क्रमशः अधोलिखितबिन्दुभिः ज्ञातुं शक्नुमः –

१. भारतीयपरम्परायां गोत्रव्यवस्था प्रचलति। किं नाम गोत्रम्? 'अपत्यं पौत्रप्रभृतिगोत्रम्'[40] इति। अर्थात् कस्यचिद् जनस्य पौत्रे सञ्जाते पितामहस्य गोत्र-सञ्ज्ञा विज्ञायते तर्हि पितामहनाम्ना पौत्रस्य विज्ञाने गोत्रप्रत्ययानां आवश्यकता भवति। अस्ति गोत्रप्रत्ययविधाने तस्य पौत्रः एतत् वाक्यमेव प्रयुज्यते। तद्धितप्रत्ययैः पुत्रस्य, पौत्रस्य, प्रपौत्रस्य, पुत्र्याः, पुत्रीपुत्रस्य, पुत्रीपौत्रस्य च सञ्ज्ञानमेकेनैव पदेन कर्तुं शक्यते तदर्थम् अपत्यप्रत्ययानां विधानं तद्धितप्रकरणे एव वरीवर्ति। तद्यथा – पुंसि - गर्गः, गार्गिः, गार्ग्यः, गार्ग्यायणः। स्त्रियाम् – गर्गः, गार्गी, गार्ग्या, गार्ग्यायणी। एवं सर्वत्रापि योज्यम्। अपत्यार्थकतद्धितप्रत्ययमन्तरा शब्दानामेषाप्रवृत्तिः कथमपि ज्ञातुं न शक्यते, अतोऽस्ति तद्धितस्य महत्त्वम्।

२. तद्धितप्रकरणे 'तदस्मिन्नस्तीति देशे तन्नाम्नि'[41], 'तेन निर्वृत्तम्'[42], 'तस्य निवासः'[43], 'अदूरभवश्च'[44] एते चत्वारोऽर्थाः विहिताः वर्तन्ते। चतुर्ष्वपि अर्थेषु ये प्रत्ययाः विधीयन्ते ते चातुरर्थिकाः इति सञ्ज्ञया विधीयन्ते। चतुर्णामप्यर्थानामग्रिमसूत्रेषु अनुवृत्तिर्भवति। तेन तत्र-तत्र ये शब्दाः निष्पाद्यन्ते तेषां चत्वारोऽर्थाः भवन्ति। यथा हिमवान् शब्दात् 'अणि' प्रत्यये 'हैमवतम्' शब्दो सिद्धो भवति। 'अण्' प्रत्ययः चातुरर्थिकोऽस्ति। तेनास्य पदस्य चत्वारोऽर्थाः भवन्ति। हिमं विद्यते यस्मिन्देशे , हिमवतो निवासः, हिमवतो अदूरभवः, हिमवता निवृत्तं हैमवतमित्युच्यते। एकस्यैव पदस्य चत्वारोऽप्यर्थाः एकेनैव प्रत्ययेन चातुरर्थिकेन तद्धितेन साधयितुं शक्यन्ते। एतावती चमत्कृतिस्तु अन्यत्राप्राप्यैव अतोऽस्ति महत्त्वं तद्धितप्रत्ययानां तद्धितप्रकरणस्य च।

३. तद्धितप्रकरणे 'शेषे'[45] इत्यतः आरभ्य 'तस्येदम्'[46] सूत्रपर्यन्तं येऽर्थाः विहिताः ते समे शेषपदेनोच्यन्ते। तेषु अर्थेषु ये प्रत्ययाः विधीयन्ते, ते समे प्रत्ययाः शैषिकाः इत्युच्यन्ते। एतस्मिन् प्रकरणे ये शब्दाः निष्पाद्यन्ते, तेषां शब्दानां शेषाधिकारे विहिताः समेऽप्यर्थाः भवन्ति – तत्र जातः, तत्र प्रायभवः, तत्र कृतः, तत्र लब्धः, तत्र क्रीतः, तत्र कुशलः, तत्र सम्भूतः, तत्र उप्तः, तदस्य सोढम्, तत्र भवः, तस्य व्याख्यानः, तत आगतः, ततः प्रभवति, तद् गच्चति, अधिकृत्य कृतः, सोऽस्य निवासः, सोऽस्य अभिजनः, सोऽस्य भक्तिः, तेन प्रोक्तम्, तेनैकदिक्, तेन उपज्ञातम्, तेन कृतम्, तस्येदम्, एतावन्तोऽर्थाः शेषार्थाः, एतेष्वर्थेषु ये प्रत्ययाः विहिताः, ते समे शैषिकाः। अस्मिन् प्रकरणे ये शब्दाः साध्यन्ते, तेषामेते समेप्यर्थाः भवन्ति। यथा – राष्ट्र शब्दात् 'घः'[47] प्रत्ययो विधीयते। तेन राष्ट्रियः शब्दस्य सिद्धिर्भवति। अस्यार्थो भवति – राष्ट्रे जातः, राष्ट्रे प्रायभवः, राष्ट्रे कृतः, राष्ट्रे लब्धः, राष्ट्रे क्रीतः, राष्ट्रे कुशलः, राष्ट्रे सम्भूतः, राष्ट्रे उप्तः, राष्ट्रमस्य सोढम्, राष्ट्रे भवः, राष्ट्रस्य व्याख्यानः, राष्ट्रात् आगतः, राष्ट्रात्प्रभवति, राष्ट्रं गच्छति, राष्ट्रमधिकृत्यकृतम्, राष्ट्रमस्य निवासः, राष्ट्रमस्याभिजनः, राष्ट्रमस्य भक्तिः, राष्ट्रेण प्रोक्तम्, राष्ट्रेण एकदिक्, राष्ट्रेण उपज्ञातम्, राष्ट्रेण कृतम्, राष्ट्रस्येदम्। एकस्य पदस्य एकस्मिन् प्रत्यये परतः एतावन्तोऽर्थाः, अहो नु किल शब्दशास्त्रम्, अहो तद्धितप्रकरणस्य माहात्म्यम्, अहो शब्दार्थस्यानन्त्यम्, अहो पाणिनेर्बुद्धिचमत्कारः, सर्वमाश्चर्यमयम्, आनन्दमयं चास्ति। एषास्ति महत्ता व्याकरणे तद्धितप्रकरणस्य।

४. अष्टाध्याय्याः पञ्चमेऽध्याये प्राक्क्रीतीयप्रकरणे छप्रत्ययस्याधिकारे येऽर्थाः विहिताः, ते समेऽप्यर्थाः एकस्यैव पदस्य यथाप्रसङ्गं सम्भवन्ति। तेऽर्थाः सन्ति – 'तस्मै हितम्'[48], तदर्थम्[49], तदस्य तदस्मिन् स्यादिति[50], तेन क्रीतम्[51], अस्मिन् प्रकरणे एकस्य शब्दस्य चत्वारोऽप्यर्थाः भवन्ति। यथा – गवे हितं – गव्यम्, गवे इदम् – गव्यम्, गोःगवि वा स्याद् – गव्यम्, गवा क्रीतम् – गव्यम्। एवं एकस्यैव पदस्य चतुर्थज्ञानायास्य तद्धितप्रकरणस्य महत्ता अस्ति।

५. सञ्ज्ञापदानां त्रिधा प्रयोगो भवति, व्यक्तिवाचिका सञ्ज्ञा, जातिवाचिका सञ्ज्ञा, भाववाचिका सञ्ज्ञा। तत्र जातिव्यक्त्योः सामान्यतया उल्लेखनीयता नास्ति। किन्तु भाववाचिकसञ्ज्ञायाः प्रयोगे ये प्रत्ययाः तेषां विधानन्तु तद्धितप्रकरणे एव वर्तते। तत्र त्वतलौ, इमनिच्, ष्यञ्, यत्, यः, ढक्, यक्, अञ्, अण्, वुञ्, छः, त्वः, इत्येतेषां प्रत्ययानां विधानमस्ति। तदन्ताः तद्धितान्ताः समस्मिन् संस्कृतसाहित्ये, हिन्दीसाहित्ये च, सर्वत्र प्रयुज्यन्ते। अन्तरा तद्धितप्रकरणं भावकर्मवाचकानां पदानां ज्ञानं भवितुं न शक्नोति। अतोऽस्ति माहात्म्यं तद्धितप्रकरणस्य, येन हि पृथुता, पृथुत्वम्, पार्थवम्, प्रथिमा इत्यादिशब्दाः सम्यक् ज्ञायेरन्।

६. तद्धितप्रकरणे एव लोकवेदयोः प्रसिद्धानां पदानां स्पष्टाः परिभाषाः दृश्यन्ते। ताः परिभाषाः विना तद्धितप्रकरणं ज्ञातुं न शक्यन्ते। यथा – 'श्रोत्रियँश्छन्दोऽधीते'[52], 'क्षेत्रियच् परक्षेत्रे चिकित्स्यः'[53], इन्द्रदत्तम्, इन्द्रतुष्टम्, इन्द्रसृष्टम्, इन्द्रदृष्टम्, इन्द्रलिङ्गम्, यत्तदिन्द्रियमिति[54], अनुपद्यन्वेष्टा[55] एभिः उदाहरणैः सिद्ध्यति यत् न केवलानां पदानामिह निष्पत्तिर्दृश्यते, अपितु साक्षात् परिभाषाः कृताः दृश्यन्ते।

७. संस्कृतसाहित्ये केचन शब्दाः तादृशाः प्रयुज्यन्ते। ये कस्मिँश्चित् विभक्त्यर्थे दृश्यन्ते यथा – ततः यतः इत्यादयः पञ्चम्यर्थे। तत्र, यत्र, सर्वत्र, इहत्र इत्यादयः सप्तम्यर्थे किन्तु एते शब्दाः विभक्तौ न सन्ति। एतेषां 'तद्धितश्चासर्वविभक्तिः'[56] सूत्रेण अव्ययसञ्ज्ञा कृता वर्तते। विभक्त्यर्थे प्रयुज्यमाना विभक्तौ प्रतीयमाना अपि विभक्तित्वं न भजन्ते। एतेषां परिज्ञानं तद्धितप्रकरणस्थस्य पञ्चमाध्यायस्य तृतीयपादात् विभक्तिप्रकरणादेव भवति। एनं प्रकरणं विना यदा, कदा, सर्वदा, इत्थम्, एतर्हि, अधुना, इह, अभितः, परितः इत्यादीनामव्ययपदानां ज्ञानं न सम्भवति। अतोऽस्त्यस्य प्रकरणस्य माहात्म्यम्।

८. 'अतिशायने तमबिष्ठनौ'[57] तुलनायां वा ये प्रत्ययाः तमबादयः अस्मिन् एव प्रकरणे विहिताः। एतेषां ज्ञानं विना अतिशयाद्यर्थेषु प्रयुक्तानां पदानां ज्ञानं भवितुं न शक्नोति। तेन गरिष्ठः, लघिष्ठः, पटीयान्, लघीयान्, ज्यायान्, कनीयान्, इत्यादिपदानां ज्ञानंकथं भविष्यति? अतः तद्धितप्रकरणमध्येयम्।

९. यां क्रियां कश्चिज्जनः अतिशयेन करोति तस्मात् क्रियावाचिनः प्रातिपदिकात् अतिशायने द्योत्ये तमप् प्रत्ययो विहितः। तमपि विहिते आम् प्रत्यये च

---

[36] अथर्व. १२/३/२
[37] अथर्व. १३/३/६
[38] यजु. १/१
[39] साम. पू. प्रपा. १, दशतिः - ७, मन्त्रम् – ५।
[40] अ. ४/१/१६२
[41] अ. ४/२/६६
[42] अ. ४/२/६७
[43] अ. ४/२/६८
[44] अ. ४/२/६९
[45] अ. ४/२/९१
[46] अ. ४/३/१२०
[47] 'राष्ट्रावारपाराद् घखौ'। अ. ४/२/९२
[48] अ. ५/१/५
[49] 'तदर्थं विकृतेः प्रकृतौ'।अ. ५/१/१२
[50] अ. ५/१/१६
[51] अ. ५/१/३६
[52] अ. ५/२/८४
[53] अ. ५/२/९२
[54] अ. ५/२/९३
[55] अ. ५/२/९०
[56] अ. १/१/३७
[57] अ. ५/३/५५

वचतितमाम्, जल्पतितमाम् आदिपदानि निष्पाद्यन्ते, एतेषां ज्ञानं विना तद्धितप्रकरणं कथमपि न सम्भवति। अतोऽस्ति माहात्म्यं तद्धितप्रकरणस्य।

१०. समस्ते संस्कृतसाहित्ये हिन्दीसाहित्येऽपि मतुबन्तानां पदानां प्रयोगो बहुधा दृश्यते। मतुप् प्रत्ययस्य विधानञ्च तद्धितप्रकरणे पञ्चमाध्यायस्य द्वितीये पादे वर्तते। अस्मिन् प्रकरणेऽनेकेभ्यः प्रातिपदिकेभ्यः मत्वर्थानां 'तदस्यास्ति, तदस्मिन्नस्ति'[58], एतदर्थानां प्रत्ययानां विधानमस्ति। तद्धितप्रकरणं विना मत्वर्थानां ज्ञानं न भवितुं शक्नोति। तेन केशवः, केशी, केशिकः, केशवान्, वत्सलः, रसालः, द्युमः, द्रुमः, मायावी, मायावान्, स्वामी इत्यादीनां पदानां ज्ञानं सुदुष्करमेव भवति। अतः तद्धितप्रकरणमतीवावश्यकमिति।

११. सङ्ख्यापरिगणने पूरणार्थानां प्रत्ययानां प्रयोगः आवश्यको भवति। हिन्दीभाषायां पहला, दूसरा इत्यादीनां पदानां कृते पूरणार्थकाः ये शब्दाः सन्ति, तेषां निष्पत्तिविषये इदमेव तद्धितप्रकरणं पारयति। तत्र हि द्वि-त्रि शब्दाभ्यां तीयः, चतुर्-शब्दात् डटि थुकागमः, पञ्चादिभ्यो नकारान्तेभ्यः डटि मडागमः, दशान्तात् डः प्रत्ययः, विंशत्यादिभ्यः अन्यतरस्याम् तमट् प्रत्ययः, शदन्तात् ऊनत्रिंशत्तः आरभ्यः ऊनषष्ठिः पर्यन्तं डः प्रत्ययः षष्ट्यादेः शतपर्यन्तं डट् प्रत्यये तमडागमः एवमेकप्रभृति शतपर्यन्ताभ्यः सङ्ख्याभ्यः पूरणेऽर्थे प्रत्ययान् आगमाँश्च विधाय प्रथमः, द्वितीयः, तृतीयः, चतुर्थः, पञ्चमः, षष्ठः, सप्तमः, अष्टमः, नवमः, दशमः, एकादशः, विंशः, विंशतितमः, त्रिंशः, त्रिंशत्तमः इत्याद्याः सर्वाः सङ्ख्याः निर्माप्यन्ते। विना तद्धितप्रकरणं कश्चित् सङ्ख्यायाः अपि ज्ञानं कर्तुं न पारयति। अतोऽस्त्यस्य प्रकरणस्य महती आवश्यकता। विना तद्धितप्रकरणं नैताः सङ्ख्याः ज्ञातुं शक्यन्ते।

१२. समासप्रकरणे यथाविधि समासान् विधाय तेभ्यः समासान्तेभ्यः प्रातिपदिकेभ्यः विभिन्नाः समासान्ताः प्रत्ययाः अस्मिन्नेव तद्धितप्रकरणे विहिताः वर्तन्ते। एतेषां ज्ञानं विना समासान्ताः शब्दाः निष्पादयितुं सामर्थ्यं न भवति। सर्वेषु समासेषु समासविध्यनन्तरमेव समासान्ताः प्रत्ययाः विधीयन्ते। यथा – राज्ञः समीपम् – उपराजम्। इत्यत्र उप+राजन् एतस्यामवस्थायां यदि अच् प्रत्ययो न स्यात् तर्हि कथं कृत्वा उपराजमिति शब्दः सिद्ध्येत। अतो समासान्तप्रत्ययोऽनिवार्यतयापेक्ष्यन्ते। तेषां विधानं तद्धितप्रकरणे एव पञ्चमाध्यायस्य चतुर्थे पादे कृतमास्ते अनेन प्रकरणेन सर्वाण्यपि समासयुक्तानि पदानि सम्यक् साध्यन्ते। तेन सुराजा, अतिराजा, विधुरः, प्रधुरः, अराजा, असखा, अपथम्, अपन्थाः, अनृचः, द्विपम्, अनुलोमम्, लवणाख्यम् एतादृशाः अनेके शब्दाः साध्यन्ते। अतोऽस्य महत्वं कस्य चक्षुष्मतो दृग्गोचरी न भवति।

एतानि सर्वाणि उपर्युक्तानि द्वादशतर्काणि यानि दीयन्ते तानि उपलक्षणमात्राणि। प्रतिसूत्रं प्रतिपदञ्च तद्धितस्य माहात्म्यं बाभाति। विनैतस्य प्रकरणस्य ज्ञानं संस्कृतभाषार्णवे न कश्चित् तरितुं क्षमो भवति। अतः तद्धितप्रकरणस्य महत्त्वं पूर्वमासीत्, अधुना वर्त्तते, भविष्यति च भविष्यत्येव नात्र शङ्कायाः अवसरः।

**तद्धितस्योपयोगिता –**

लौकिकवैदिकोभयशब्दानामनुशासनं पाणिनिव्याकरणस्य ध्येयम्। उभयेऽपि वाङ्मये आचार्यः साफल्यमधिगतवान्। अद्यत्वे केचन जनाः वैदिकप्रकरणमधुनानुपयोगीति कृत्वा वैदिकं त्यजन्ति। अपरे तद्धितप्रत्ययान्तानामद्य प्रयोगो नास्तीति कृत्वा तद्धितमपि त्यजन्ति। ते कथयन्ति अद्यत्वे अपत्यार्थकनाम्नां प्रयोगो न भवतीति अपत्यप्रत्ययानां का आवश्यकता? पुनश्च प्रमाणवाचकानां परिमाणवाचकानां च प्राचीनानां प्रयोगो न भवतीति तेषामपि आवश्यकता नास्ति। एतद्वीक्ष्य वक्तुं मनो भवति यत् –

**'गता वेदविद्या गतं धर्मशास्त्रं, गतं रे गतं न्यायसूत्रं तथैव।**
**इदानीन्तनानां जनानां प्रवृत्तिः, सुबन्ते तिङन्ते कदाचित् कृदन्ते"॥**

किं बहुना आङ्ग्लभाषायाः प्रभावेण संस्कृतभाषा तिरोहितेव वर्त्तते। अर्थकामेष्वसक्तानां धनपशूनां जीवनेषु आध्यात्मिकशक्तिसम्पन्नायाः ईश्वरप्रचिताया ज्ञानराशिभूतायाः संस्कृतभाषायाः किं महत्त्वमिति कृत्वास्याः भाषायाः पठनपाठनस्यावश्यकतामेवनानुभवन्ति किन्तु अस्मदीयो विश्वासोऽस्ति यदिदं जगत् लम्बायमानो नास्ति किन्तु वर्तुलाकारो वर्तते। एकस्मिन् दिवसे पुनरपि जगदत्रैव आगन्तेति। अतः संस्कृतभाषायाः तत्रस्थज्ञानस्य तत्रस्थप्रयोगाणां च महती उपयोगिता वर्तते वर्तिष्यते च। ऐतिह्यदिशा तद्धितप्रकरणस्य विवेचनेनानेकेषां प्राचीनानां ग्रामाणां, नगराणामवस्थितिरवगम्यते। अनेके सिद्धान्ताः पदनिष्पत्तिः सकाशादेव अनेन प्रकरणेन ज्ञायन्ते। अस्मिन्नेव प्रकरणे अपत्यर्थकाः, मत्वर्थीयाः, समासान्ताः, शैषिकाः, अव्ययसञ्ज्ञकाः प्रत्ययाः विहिताः वर्तन्ते। येषां ज्ञानं विना न कोऽपि जनः शब्दशास्त्रमधिगन्तुं पारयते। यानि अन्तर्भूतानि प्रकरणानि अस्मिन् तद्धितप्रकरणे वर्त्तन्ते तेषां सुज्ञानं सर्वथा, सर्वदा, सर्वतोभावेन आवश्यकमेव। विना व्याकरणं अन्धः पङ्गुवच्च जनः न हि पदमपि पत्तुं शक्नोति। अतोऽस्य सर्वथोपयोगितास्त्येव।

**सन्दर्भग्रन्थसूची**

➢ **प्राथमिकानि स्रोतांसि** –


1. अष्टाध्यायी (चन्द्रलेखा-हिन्दीव्याख्यायुताऽनेकोपयोगिविषयैरुपबृंहिता सूत्रपाठादिसूच्या चान्विता प्रथमो भागः), महर्षिपाणिनिः, व्याख्याकारः-पं. ईश्वरचन्द्रः, चौखम्बा संस्कृतप्रतिष्ठानम्, नवदेहली, २०१४.
2. कालिदासीया तद्धितान्तरमणीयता डॉ. जयकान्तसिंहशर्मा, अमरग्रन्थपब्लिकेशन्स, नवदेहली, प्रथमसंस्करणम्, २००३.
3. काशिकावृत्तिः (न्यासपदमञ्जरीसहिता), श्रीवामनः जयादित्यः, सम्पादकः - द्वारकादासशास्त्री, सुधी प्रकाशन, वाराणसी, द्वितीयसंस्करणम् - १९८३
4. काशिकावृत्तिः (चतुर्थपञ्चमषष्ठाध्यायात्मकद्वितीयभागः) वामनः & जयादित्यः, व्याख्याकारः - पं. ईश्वरचन्द्रः, चौखम्बासंस्कृतप्रतिष्ठानम्, नवदेहली, २०१०.
5. परमलघुमञ्जूषा (किरणावलीसंस्कृतव्याख्योपेतहिन्द्यनुवादसहिता), व्याख्याकारः - आचार्यलोकमणिदहालः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी.
6. वाक्यपदीयम् (ब्रह्मकाण्डम्) (सोपज्ञवृत्या अम्बाकर्त्र्या च सम्भूषितम्), सम्पूर्णानन्दसंकृतविश्वविद्यालयः, वाराणसी, १९८८.
7. वाक्यपदीयम् (तृतीयकाण्डम्) (वृत्तिसमुद्देशात्मकम्) (हेलाराजविरजितप्रकाशव्याक्यया रघुनाथशर्मविरचितया अम्बाकर्त्रीव्याख्यया समलङ्कृतम्), भर्तृहरिः, सम्पादकः- डॉ. भागीरथप्रसादत्रिपाठी "वागीशः शास्त्री", सम्पूर्णानन्दसंकृतविश्वविद्यालयः, वाराणसी, १९७७.
8. वाक्यपदीयम् (पदकाण्डम्, भूयोद्रव्य-गुण-दिक्-साधन-क्रियाकाल-पुरुष-संख्या-उपग्रह-लिङ्गसमुद्देशात्मकम्) तृतीयभागः (श्रीहेलाराजविरजितप्रकाशव्याख्यया रघुनाथशर्मविरचितया अम्बाकर्त्रीव्याख्यया समलङ्कृतम्), भर्तृहरिः, सम्पूर्णानन्दसंकृतविश्वविद्यालयः, वाराणसी, १९९७
9. वैयाकरणसिद्धान्तमञ्जूषा, नागेशभट्टः, सम्पादकः - कपिलदेवशास्त्री, विशालप्रकाशनम्, कुरुक्षेत्रम्, १९८५.
10. व्याकरणमहाभाष्यम् (कैयटनिर्मितप्रदीपव्याख्यान्वितम्मधुसूदनप्रसादमिश्रकृत-प्रकाशव्याख्यान्वितञ्च), पतञ्जलिः, चौखम्बा विद्याभवन : वाराणसी , 2003.
11. व्याकरणमहाभाष्यम् ("ज्योत्सना" समुद्भासितम्) (चतुर्थोऽध्यायः), महर्षिपतञ्जलिः, टीकाकारः सम्पादकश्च - डॉ. हरिनारायणतिवारी, चौखम्बापब्लिशिंगहाउस, नवदेहली, २००९.
12. व्याकरणमहाभाष्यम् ("ज्योत्सना" समुद्भासितम्) (पञ्चमोऽध्यायः), महर्षिपतञ्जलिः, टीकाकारः सम्पादकश्च - डॉ. हरिनारायणतिवारी, चौखम्बा पब्लिशिंगहाउस, नवदेहली, २००९.
13. व्युत्पत्तिवादः (कृष्णभट्टी-गूढार्थतत्त्वालोक-आदर्श-जया-दीपिका-प्रकाश-शास्त्रार्थकलाव्याख्याभिः समलङ्कृतः), गदाधरभट्टाचार्यः, सम्पादकः - अच्युतानन्ददाशः, न्यू भारतीय बुक कॉरपोरेशन, नवदेहली, प्रथमसंस्करणम् - २००४.


[58] 'तदस्यास्त्यस्मिन्निति मतुप्'। अ. ५/२/९४

14. लघुशब्देन्दुशेखरः (दीपिकाहिन्दीव्याख्योपेतःकारकाव्ययीभावप्रकरणात्मकः तृतीयभागः), नागेशभट्टः, व्याख्याकारः पं. ताराकान्तझा, सम्पादकः (डॉ.) पं. श्रीकृष्णानन्दझा, स्नातकोत्तरव्याकरणविभागः, कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः, दरभङ्गा,२००३.
15. लघुशब्देन्दुशेखरः (महामहोपाध्यायपण्डितप्रवरश्रीभैरवमिश्रविरचितया चन्द्रकलया टीकया समेतः) नागेशभट्टः, सम्पादकः संशोधकश्च- पं. गोपालशास्त्रीनेने, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, तृतीयसंस्करणम् - २००१.
16. शब्दशक्तिप्रकाशिका ("कृष्णकान्ती" टीकया अलङ्कृता) जगदीशतर्कालङ्कारभट्टाचार्यः, सम्पादकः - पण्डितढुण्ढिराजशास्त्री, चौखम्भाप्रकाशनम्, वाराणसी, चतुर्थसंस्करणम् - २०६४ वि०सं०.
17. शाब्दबोधमीमांसा (सुबन्तपदार्थविचारात्मकः तृतीयो भागः), एन्.एस्. रामानुजताताचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली.
18. सर्वदर्शनसङ्ग्रहः (दर्शनाङ्कुराभिधया व्याख्ययासमेतः), सायणमाधवाचार्यः, निर्णयसागरमुद्रणालयः : मुम्बई, 1924
19. सिद्धान्तकौमुदी (बालबोधिनीतत्त्वबोधिनीसम्वलिता), भट्टजोजिदीक्षितः, सम्पादकौ - गिरिधरशर्मा चतुर्वेदः परमेश्वरानन्दशर्मा च, मोतीलालबनारसीदास, नई दिल्ली - १९६१, दशम संस्करण-२००१.
20. सिद्धान्तकौमुदी (जिनेन्द्रसरस्वतीरचिततत्त्वबोधिनीटीकया संवलिता जयकृष्णविहितसुबोधिन्याख्याटीकया समुपेता च), भट्टोजिदीक्षितः, सम्पादकः – भार्गवशास्त्री, निर्णयसागरमुद्रणालयः : मुम्बई, 1942

➢ **द्वितीयकस्रोतांसि-**

1. तद्धित प्रत्ययों का समालोचनात्मक अध्ययन, लेखक- डॉ. नन्दकिशोर शर्मा, मनीषा प्रकाशन, मुजफ्फरपुर, प्रथम संस्करण-१९८०.
2. दार्शनिक विवेचनाएँ, हरिमोहन झा, बिहार हिन्दी ग्रन्थ अकादमी : पटना, 1937
3. भारतीय दर्शन का इतिहास, सुरेन्द्रनाथ दासगुप्ता, अनुवादकद्वय - कलानाथ शास्त्री व सुधीर कुमार, राजस्थान हिन्दी ग्रन्थ अकादमी : जयपुर, 1978
4. व्याकरणतन्त्र का काव्यशास्त्र पर प्रभाव, हरिराम मिश्र, ईस्टर्न बुक लिंकर्स : दिल्ली, 1994
5. व्याकरणिककोटियोः का विश्लेषणात्मक अध्ययन, लेखिका सम्पादिका च – डॉ. दीप्ति शर्मा, बिहार हिन्दी ग्रन्थ अकादमी, पटना, १९७५ई.
6. लघुसिद्धान्तकौमुदी (भैमीव्याख्या पञ्चम-भाग), व्याख्याकार - भीमसेनशास्त्री, भैमी प्रकाशन, दिल्ली, द्वितीयसंस्करणम् - २००६.
7. संस्कृत व्याकरण शास्त्र का इतिहास (भाग १-३), (लेखक) पं. युधिष्ठिर मीमांसक, रामलाल कपूर ट्रस्ट, बहालगढ, सोनीपत, हरियाणा, २०५७ वि.सं.
8. संस्कृत व्याकरण दर्शन, लेखक – रामसुरेश त्रिपाठी, प्राइवेट लिमिटेड, दिल्ली, प्रथमसंस्करणम्-१९७२.
9. संस्कृत शास्त्रों का इतिहास, बलदेव उपाध्याय, चौखम्बा विद्याभवन : वाराणसी, 1994
10. सिद्धान्तकौमुदीतद्धितप्रकरणस्थतत्त्वबोधिनीबालमनोरमाटीकयोस्तुलनात्मकम ध्ययनम् (विद्यावारिधिशोधप्रबन्धः), शोधकर्त्ता-रामनारायणझा, शोधनिर्देशकः- प्रो० देवीकान्तमिश्रः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली, १९९३
11. G.A. gerierson's lingustic survey of India (A sumery part-1) siddheshwar varma, vishveshavaranand institue, hoshiarpur, Panjab, 1972.
12. Pāṇini: (A survey of reseach), Geroge cardona, motilal banarshidass, first Indian Reprint: Delhi, 1980.